**षष्ठोऽध्यायः**

# ग्रामस्य प्रशासनम्



भारते षड्लक्षाधिकाः ग्रामाः सन्ति। तेषां जल-विद्युत-राजमार्गादीनां याः आवश्यकताः सन्ति तासाम् आपूर्तिः सरलं कार्यं नास्ति । एतदतिरिच्य भूमेः अभिलेखानां संरक्षणं करणीयं भवति। एतेषां सर्वेषां कार्याणां व्यवस्थार्थं ग्रामस्य प्रशासनिक-संरचना भवति। अस्मिन् पाठे वयं द्वयोः ग्रामीण-प्रशासनिकाधिकारिणोः कार्यस्य विषये किञ्चित् विस्तरेण पठिष्यामः।

**ग्रामे कलहः**

मोहनः कश्चित् कृषकः अस्ति । तस्य परिवारस्य पार्श्वे काचित् कृषियोग्या भूमिः अस्ति यस्यां सः बहुभ्यः वर्षेभ्यः कृषिं करोति। तस्य क्षेत्रेण सहैव संलग्नम् रघोः क्षेत्रम् अस्ति । द्वयोः क्षेत्रे कयाचित् लघ्व्या क्षेत्रसीमया पृथक् भवतः।

*एकदा प्रातः मोहनः दृष्टवान् यत् रघुः क्षेत्रसीमां किञ्चित् अग्रे वर्धितवान् आसीत् एवं कृत्वा सः मोहनस्य काञ्चित् भूमिं स्वक्षेत्रे मेलितवान् अपि च स्वक्षेत्रस्य आकारं सः वर्धितवान् । मोहनः कोपान्वितः जातः परन्तु सः किञ्चित् भयक्रान्तः अपि आसीत् रघोः परिवारस्य पार्श्वे बहुभूमिः आसीत् अपि च एतदतिरिच्य तस्य ज्येष्ठपितृव्यः ग्रामस्य पञ्चप्रमुखः आसीत् । पुनरपि मोहनः साहसपुरस्सरं रघोः गृहं प्राप्तवान् । द्वयोः मध्ये वाक्कलहः जातः । रघुः तु स्वदोषम् एव न अङ्गीकृतवान् यत् सः क्षेत्रसीमाम् अग्रे वर्धितवान् आसीत् । किञ्चित् कालानन्तरं तत्र कलहः प्रारब्धः ।*

*रघुः स्वस्य एकं श्रमिकम् आहूतवान् । द्वौ मिलित्वा मोहनाय क्रुध्यतः स्म । पुनः ते मोहनस्य ताडनम् आरब्धवन्तः । कोलाहलं श्रुत्वा प्रतिवेशिनः बहिः आगताः । ते दृष्टवन्तः यत् मोहनस्य ताडनं भवति । मध्ये आगत्य ते मोहनस्य रक्षणं कृतवन्तः ।*

*मोहनस्य शिरसि हस्तयोः च अनेके व्रणाः जाताः । केनचित् प्रतिवेशिना तस्य प्रारम्भिक-चिकित्सा कृता । मोहनस्य कश्चित् मित्रं यः पत्रालये कार्यं करोति स्म परामर्शं दत्तवान् यत् मोहनः आरक्षकालयं गत्वा तत्र प्राथमिकीं लेखयेत् । परन्तु केचन जनाः एतस्य कार्यस्य विरोधं कुर्वन्ति स्म । ते अनुभवन्ति यत् आधिक्येन धनव्ययः भविष्यति अपि च परिणामः किञ्चित् अपि न आगमिष्यति । केचन जनाः उक्तवन्तः यत् रघोः परिवारजनाः तु पूर्वमेव आरक्षकालयं प्राप्तवन्तः स्युः । चिरकालस्य विचार-विमर्शानन्तरम् इदं निश्चितं यत् येषां प्रतिवेशिनां समक्षे मोहनस्य ताडनम् अभवत् अथवा एषा घटना घटिता मोहनः तान् सर्वान् स्वीकृत्य आरक्षकालयं गमिष्यति ।*

**आरक्षकालयस्य क्षेत्रम्**

*आरक्षकालयस्य मार्गे कश्चित् प्रतिवेशी पृष्टवान्, किं वयं किंचित् अधिकं धनव्ययं कृत्वा नगरस्य महान्तम् आरक्षकालयं गच्छेम ? मोहनः बोधितवान् यत् धनस्य वार्ता नास्ति । वयम् एतस्मिन् आरक्षकालये एव स्वप्राथमिकीं लेखयितुं शक्नुमः यतोहि अस्माकं ग्रामः एतस्मिन् कार्यक्षेत्रे एव आगच्छति ।*

- यदि भवतः गृहे चौर्यं भवति तर्हि भवन्तः कम् आरक्षकालयं गत्वा स्वदूषणं लेखयितुं शक्ष्यन्ति ?
- रघु-मोहनयोर्मध्ये कम् विषयम् अधिकृत्य विवादः अभवत् ?
- मोहनः कस्मात् कारणात् रघुना सह कलह-समये बिभेति स्म ?
- केचन जनाः उक्तवन्तः यत् मोहनेन आरक्षकालये प्राथमिकी लेखनीया अपरञ्च केचन जनाः उक्तवन्तः यत् एतत् कार्यं समीचीनं नास्ति । जनाः स्वपरामर्शस्य पक्षे कान् कान् तर्कान् दत्तवन्तः ।



*प्रत्येकम् आरक्षकालस्य कश्चित् कार्यक्षेत्रं भवति यत् तस्य नियन्त्रणे भवति । जनाः तस्मिन् क्षेत्रे जातानां चौर्य-दुर्घटना-ताडन-कलहादीनां च प्राथमिकीं तस्मिन् आरक्षकालये एव लेखयितुं शक्नुवन्ति । इदं तत्रत्यस्य आरक्षकाधीशस्य दायित्वं भवति यत् सः जनेभ्यः घटनायाः विषये जानीयात् निरीक्षणं च कुर्यात् अपि च स्वक्षेत्रस्य अन्तर्विषयेषु क्रियान्वयनं कुर्यात् ।*

**आरक्षकालये जायमानं कार्यम्**

यदा सर्वे जनाः आरक्षकालयं प्राप्तवन्तः तदा मोहनः आरक्षकाधीशस्य पार्श्वे गतवान् अपि च तस्य पुरतः सर्वं विषयम् उपस्थापितवान् । सः एतद् अपि उक्तवान् यत् सः लिखितरूपेण स्वदूषणं दातुम् इच्छति । आरक्षकालयाधीशः दुर्व्यवहार-पुरस्सरम् उक्तवान् यत्तस्य पार्श्वे लघुदूषणानां निरीक्षणाय

समयः न अस्ति। मोहनः स्वव्रणान् अपि दर्शितवान् परन्तु आरक्षकालय-प्रमुखस्य उपरि कोऽपि प्रभावः न जातः। मोहनः आश्चर्यचकितः आसीत् यत् तस्य दूषणं वस्तुतः किमर्थं न लिख्यते स्म।

मोहनः बहिः गतवान् अपि च सः स्वस्य प्रतिवेशिनः आहूय आनीतवान्। प्रतिवेशिनः आरक्षकालय-प्रमुखं बोधितवन्तः यत् मोहनः तेषां समक्षे ताडितः। यदि ते तस्य रक्षणं न अकरिष्यन् तदा तस्य शरीरे इतोऽपि गभीरव्रणाः अभविष्यन्। तस्य प्राथमिकी स्वीकृता भवेत् एतदर्थं ते प्रतिवेशिनः दृढतया उक्तवन्तः। अन्ततः आरक्षकालय-प्रमुखः सिद्धः जातः। सः मोहनं स्वदूषणं लिखित्वा दातुम् उक्तवान्। आरक्षकालय-प्रमुखः समाश्वासितवान् यत् अग्रिमे प्रातः कश्चित् सैनिकः घटनायाः निरीक्षणार्थं तस्य गृहम् गमिष्यति।

आरक्षकालये यत्किमपि जातं तत् कस्यचित् नाटकस्य रूपेण दर्शयन्तु। पुनः इदं बोधयतु यत् मोहनस्य आरक्षकालय-प्रमुखस्य प्रतिवेशिनां च दायित्वं निर्वहन्तः भवन्तः कथम् अनुभूतवन्तः? किं आरक्षकालय-प्रमुखः एतस्याः स्थितेः समाधानं केनचित अन्येन उपायेन कर्तं शक्नोति स्म?

## राजस्वविभागस्य कार्यम्

भवन्तः पठितवन्तः यत् रघुमोहनयोः मध्ये क्षेत्रस्य सीमाम् अधिकृत्य महान् कलहः जातः। किम् एतादृशः कश्चित् उपायः नासीत् यस्मात् तौ स्वविषयस्य शान्तिपूर्ण-रूपेण समाधानं कर्तुं शक्नुयाताम्। किं केचन एतादृशाः अभिलेखाः अथवा कीर्तिमानाः भवन्ति येभ्यः एतत् ज्ञानं भवेत् यत् ग्रामे कस्य पार्श्वे का भूमिः अस्ति? आगच्छन्तु, जानीमः यत् इदं कार्यं कथं क्रियते।

भूमेः मापनं अपि च तस्य विवरण-संरक्षण-कार्यं भूविवरण-स्थापकाधिकारिणः (पटवारी) मुख्यकार्यं भवति। भिन्नेषु भिन्नेषु राज्येषु सः पृथक्-पृथक् नाम्नः ज्ञायते- कुत्रचित् पटवारी कुत्रचित् लेखपालः कुत्रचित् कर्मचारी कुत्रचित् ग्रामीणाधिकारी कुत्रचित् च कानूनगो इति उच्यते। वयम् अत्र भूमेः विवरणस्थापकस्य कर्मचारिणः कृते पटवारी इति शब्दस्य प्रयोगं कुर्मः। प्रत्येकं पटवारी केषाञ्चित् ग्रामाणां कृते उत्तरदायी भवति अग्रिमे पृष्ठे प्रदत्त-मानचित्रानुसारं अपि च तस्य अनुसारं निर्मितसंचिकायाः विवरणं पश्यन्तु। अयं



यदि भवन्तः ग्रामीणक्षेत्रे निवसन्ति तदा जानन्तु – भवतां क्षेत्रस्य पटवारी कति ग्रामाणां कृते भूमेः अभिलेखान् स्थापयति? ग्रामवासिनः पटवारिणा सह कथं सम्पर्कं साधयन्ति?

पटवारिद्वारा सुरक्षितं-ग्रामस्य जनानां भूमेः विवरणस्य कश्चित् भागः अस्ति।

सामान्यरूपेण पटवारिणां पार्श्वे क्षेत्रमापनस्य पृथक्-पृथक् उपायाः भवन्ति । बहुषु स्थानेषु कस्याश्चित् लम्बतरायाः लौहस्य शृङ्खलायाः प्रयोगं कुर्वन्तु । सः 'जरीबः' इति उच्यते । उपरि प्रदत्तायां कथायां पटवारी मोहनस्य रघोः च क्षेत्राणि मापयित्वा इदं द्रष्टुं शक्नोति स्म यत् सः ग्रामस्य मानचित्रेण समतां भजन्ते न वा । यदि तत् क्षेत्र मानचित्रेण समतां न भजते तदा सः ज्ञातुं शक्नोति यत् क्षेत्रसीमां अग्रे कृत्वा क्षेत्रस्य सीमा परिवर्तिता अस्ति । खसराख्यस्य अस्मिन् विवरणसञ्चिकायां पटवारी अधोलिखित-भूमेः मानचित्रस्य अनुसारं सूचनाः पूरितवान् अस्ति। एतस्मात् ज्ञायते यत् भूमेः कः खण्डः

कस्य नाम्नः अस्ति । एतत् विवरणं तथा च मानचित्रं पश्यन्तु तथा च रघुमोहनयोः भूमेः सम्बन्धित-प्रश्नानाम् उत्तराणि यच्छन्तु । पटवारी कृषकेभ्यः भूमिकरम् अपि एकत्रीकरोति अपि च सर्वकारं स्वक्षेत्रे जायमानां सस्यानां विषये सूचनां ददाति। इदं कार्यं सः स्वस्य विवरणानाम् आधारेण करोति।

| नं | क्षेत्र-हैक्टेयर-मध्ये | भूस्वामिनः नाम, पितुः/पतेः नाम, पत्रसङ्केतः | यदि बटाई इत्यस्मिन् अस्ति तर्हि अपरस्य नाम तथा च बटाई इत्यस्य भागः | अस्मिन् वर्षे कर्षितभूमिः सस्यानि | क्षेत्रं | अन्यसस्यानि | परतीभूमिः सुविधाः |
|---|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ |
| १ | ०७५ | मोहनः,वल्दः राजारामः ग्रामः अमरापुरा भूस्वामी | न | सोयाबीन | ०.७५ हेक्टेयरः | | |
| २ | ३.०० | रघुरामः वल्दः रतनलालः ग्रामः अमरपुरा भूस्वामी | न | सोयाबीनः,गेंहूँ सिंचितभूमिः | २.७५ हेक्टेयरः | १.७५ | ०.२५ |
| ३ | ६.०० | मध्यप्रदेशसर्वकारीयः घासस्य क्षेत्रम् | नैव | - | | | |

**अस्मिन् वर्षे कर्षिता भूमिः**

(क) मोहनस्य क्षेत्रस्य दक्षिणे या भूमिः अस्ति सा कस्य अस्ति ?

(ख) रघुमोहनयोः भूमेः मध्यस्थायाः सीमायाः उपरि चिह्नं योजयतु।

(ग) क्षेत्रसङ्ख्यात्रयं कः प्रयोक्तुं शक्नोति ?






(घ) क्षेत्रसङ्ख्याद्वित्रिभ्यां सम्बन्धिता काः सूचनाः वयं प्राप्तुं शक्नुमः ?

अतः आवश्यकम् अस्ति यत् सः तानि यथाकालं परिष्कुर्यात् । कृषकाः बहुधा सस्यस्य परिवर्तनं कुर्वन्ति किञ्चित् पृथक् प्ररोहन्ति अथवा कश्चित् कुत्रचित् कूपं खनति। एतेषां सर्वेषां विवरणस्थापनं सर्वकारस्य राजस्वविभागस्य भवति । एतस्य विभागस्य वरिष्ठजनाः एतस्य कार्यस्य निरीक्षणं कुर्वन्ति।

भारतस्य सर्वाणि राज्यानि जनपदेषु विभक्तानि सन्ति। भूसम्बद्ध-विषयाणां व्यवस्थार्थम् एतानि जनपदानि इतोऽपि लघुखण्डेषु विभक्तानि सन्ति । जनपदस्य उपखण्डाः बहुभिः नामभिः ज्ञायन्ते यथा उपमण्डलं तालुका इत्यादिः । सर्वोच्चतमः मण्डलाधिकारी भवति तथा च तस्य अधः उपमण्डलाधिकरी भवति एतैः विभिन्नानां समस्यानां समाधानं करणीयं भवति। एते पटवारी इत्यस्य कार्यस्य निरीक्षणं कुर्वन्ति अपि च सुनिश्चितं कुर्वन्ति यत् विवरणानि सम्यक् प्रकारेण स्थापितानि स्युः अपि च राजस्वस्य (विविधप्रकारकस्य करस्य) एकत्रीकरणं स्यात्। ते इदं कार्यम् अपि पश्यन्ति यत् कृषकाः सरलतया स्वविवरणम् आवश्यतायां सत्यां प्राप्तुं शक्नुयुः । ते विद्यार्थिभ्यः आवश्यकतायां सत्यां जाति-प्रमाण-पत्रादिकम् अपि यच्छन्ति । उपमण्डलाधिकरणः कार्यालये भूसम्बद्धविवादानां श्रवणं भवति।

**कश्चित् नूतनः अधिनियमः**

(हिन्दू-अधिनियम-धारा, २००५)

कृषकाः प्रायः स्वक्षेत्रस्य मानचित्रस्य विवरणस्य च आवश्यकताम् अनुभवन्ति। एतदर्थं तैः किञ्चित् शुल्कं देयं भवति। कृषकाणां पार्श्वे एतस्य विवरणं प्राप्तुम् अधिकारः अस्ति। यद्यपि कदाचित् ते स्वक्षेत्राणां विवरणं सरलतया न प्राप्नुवन्ति। जनैः एतं प्राप्तुं बह्वीनां समस्यानां सम्मुखीकरणं करणीयं भव ति। बहुषु राज्येषु एतानि सर्वाणि विवरणानि सङ्गणकयन्त्रे स्थापयित्वा पंचायत्तस्य कार्यालये स्थाप्यन्ते यतः तानि सरलतया जनानां कृते उपलब्धाः स्युः अपि च नूतनानां योजनानाम् अनुसारं नियमितरूपेण समीचीनतराणि भवेयुः।

भवन्तः किम् अनुभवन्ति यत् कृषकाणां कृते एतस्य विवरणस्य आवश्यकता कदा भवति ? अधोलिखिताः स्थितीः पठन्तु अपि च तान् विषयान् परिचिन्वन्तु येषु भूमेः विवरणानि आवश्यकानि भवन्ति। इदम् अपि बोधयन्तु यत् तानि किमर्थम् आवश्यकानि भवन्ति ?

- एकः कृषकः अपरकृषकात् भूमिं क्रेतुम् इच्छति।
- एकः कृषकः स्वसस्यम् इतरकृषकं विक्रेतुम् इच्छति।
- कश्चित् कृषकः स्वभूमौ कूपं खनितुं वित्तकोशतः ऋणम् इच्छति।
- कश्चित् कृषकः स्वक्षेत्राणां कृते उर्वरकं क्रेतुम् इच्छति।
- कश्चित कषकः स्वभमिं स्वपत्रपत्र्यादिष च वण्टयितम इच्छति।

यदा वयं तेषां कृषकाणां विषये चिन्तयामः येषां पार्श्वे भूमिः अस्ति तर्हि सामान्यरूपेण अस्माकं दृष्टौ पुरुषाः भवन्ति । महिलानां अधिकारः केवलं कृषिकार्ये कस्यचित् सहायकस्य रूपेण मन्यते तासां विषये भूमेः स्वामिनीरूपेण कदाचित् अपि न चिन्त्यते । अद्यपर्यन्तं केषुचित् राज्येषु हिन्दुमहिलाः परिवारस्य भूमेः भागः न लभन्ते स्म । पितुः मृत्योः अनन्तरं भूमिः पुत्रेषु वण्ट्यते स्म । सद्य एव एषः अधिनियमः परिवर्तितः अस्ति । नूतनस्य अधिनियमस्य अनुसारं पुत्राणां पुत्रीणां तस्य मातुः च कृते भूमेः समानः भागः मिलति । अयम् अधिनियमः सर्वेषु राज्येषु केन्द्रशासितप्रदेशेषु च क्रियान्वयितः भविष्यति ।

एतस्मिन् अधिनियमे व्यापकसङ्ख्यायां महिलाः लाभान्विताः भविष्यन्ति । उदाहरणार्थं सुधा कस्यचित् कृषकपरिवारस्य ज्येष्ठतमा पुत्री

**कस्याश्चित् पुत्र्याः अभिलाषः**

न्यासरूपेण प्राप्तम् इदं गृहम्  
पिता अपि स्वपितुः इदं गृहं लप्स्यते  
मम भ्राता अपि मम पितुः  
परन्तु अहं मम माता च आवयोः किम् ?  
बोधिता अहं  
पितुः गृहे भागस्य वार्ता महिलाः न कुर्वन्ति  
परन्तु अहं स्वकीयं गृहम् इच्छामि  
सर्वतः मम स्वगृहं  
न इच्छाम्यहं दाने कौशेयं सुवर्णं च




**अन्यसार्वजनिकसेवाः – कश्चित् सर्वेक्षणम्**

अस्मिन् पाठे वयं सर्वकारस्य केषाञ्चित् प्रशासनिक-कार्याणां विषये पठितवन्तः, विशेषतया ग्रामीणक्षेत्रस्य सन्दर्भे । प्रथमम् उदाहरणम् अधिनियम-व्यवस्था-स्थापनस्य विषये आसीत् अपि च अपरः भूमेः अभिलेखानां व्यवस्थायाः विषये । प्रथमे सन्दर्भे अस्माभिः आरक्षकाणां भूमिकायाः परीक्षणं कृतम् अपि च अपरस्मिन् पटवारी-महोदयस्य कर्त्तव्यस्य विषये । एतेषां कार्यस्य विभागस्य अन्यजनैः निरीक्षणं क्रियते यथा पुलिसाधीक्षकः अथवा उपमण्डलाधिकारी । अस्माभिः इदमपि दृष्टं यत् एतेषां सौविध्यानां प्रयोगं जनाः कथं कुर्वन्ति अपि च तेषां पुरतः कीदृश्यः समस्याः समायान्ति । एतासां सेवानाम् उपयोगः अधिनियमानाम् अनुसारं भवेत् । भवद्भिः सम्भवतः सर्वकारस्य अन्यैः विभागैः प्रदत्ताः सार्वजनिकाः सेवाः दृष्टाः भविष्यन्ति ।

स्वस्य ग्रामस्य क्षेत्रस्य च कृते दीयमानानां सार्वजनिक-सेवानां काञ्चित् सूचीं कुर्वन्तु- दुग्धोत्पादक-समितिः, अन्नापणः, वित्तकोशः, आरक्षकालयः, बीजोर्वरकयोः कृते कृषकसमितिः, पत्रालयः, आंगनवाटिका, सर्वकारीयविद्यालयः, प्राथमिक-स्वास्थ्यकेन्द्रम्, चिकित्सालयादिः ।

तिसृणां सार्वजनिकसेवानां विषये सूचनाः एकत्रीकुर्वन्तु अपि च स्वाध्यापिकया सार्धं चर्चां कुर्वन्तु यत् एतासां कार्यप्रणाल्यां कथं परिष्कारः कर्तुं शक्यते । भवतां कृते किञ्चित् उदाहरणम् अग्रे प्रदत्तम् अस्ति ।

अस्ति। सा विवाहिता अस्ति अपि च पार्श्वस्थे ग्रामे निवसति।

स्वस्य पितुः मृत्योः अनन्तरं सुधा प्रायः कृषेः कार्ये मातुः साहाय्यार्थम् आगच्छति। तस्याः माता पटवारीमहोदयम् उक्तवती यत् भूमौ अधुना पुत्रेण सह तस्याः द्वयोः पुत्र्योः च अपि नाम विवरणे आगच्छेत्।

सुधायाः माता महता आत्मविश्वासेन कनिष्ठपुत्रस्य पुत्र्याः च साहाय्येन कृषेः कार्यं करोति । सुधा अपि निश्चिन्ता अस्ति यत् आवश्यकतायां सत्यां सा स्वभूभागस्य भूम्या स्वजीवन-निर्वहणं कर्तुं शक्नोति।

| सार्वजनिकसभा | भवन्तः तेषां कार्यस्य विषये किं दृष्टवन्तः ? | नियन्त्रणे आगम्यमानानि क्षेत्राणि | एतस्य सौविध्यस्य लाभं प्राप्तुं तैः किं करणीयम् अस्ति | ये इदं सर्वं प्रददति तेषां समस्याः | जनानां समस्याः | किं परिष्काराः कर्तुं शक्यन्ते? |
|---|---|---|---|---|---|---|
| अन्नस्य आपणः | अयम् आपणः उद्घटितः आसीत्। त्रयः जनाः आगतवन्तः तेषां पार्श्वे पीतवर्णस्य पत्राणि आसन्। सर्वे तण्डुलान् शर्करां च क्रीतवन्तः, मृत्तैलं न प्राप्तम्। | इदं द्वयोः ग्रामयोः कृते अस्ति। | भवतः कृते अन्नपत्रस्य आवश्यकता अस्ति,इदम् उपमण्डलाधिकारिणः कार्यालये निर्मीयते। | मृत्तैलस्य आपूर्तिः पूर्णा नास्ति। | तण्डुलाः बहु असमीचीनाः आगच्छन्ति। मृत्तैलं तु कदाचित् अपि न लभते। | शोभनाः तण्डुलाः आगच्छेयुः। मृत्तैलं लभ्येत। अन्नस्य आपणः प्रतिदिनम् उद्घटेत्। |
| स्वास्थ्यकेन्द्रम् | | | | | | |
| दुग्धोत्पादकसमितिः | | | | | | |

अभ्यासः

१. आरक्षकाणां किं कार्यं भवति ?

२. भूलेखाधिकारिणः कार्यद्वयं वदन्तु ।

३. उपमण्डलाधिकारिणः किं कार्यं भवति ?

४. "कस्याश्चित् पुत्र्याः अभिलाषः" इति कवितायां कस्य विषयस्य उत्थापनस्य प्रयासः कृतः अस्ति? किं भवन्तः एनं विषयं महत्त्वपूर्णम् इति अनुभवन्ति ? किमर्थम् ?

५. गतपाठे भवन्तः पंचायत्तस्य विषये पठितवन्तः । पंचायत्तस्य भूलेखाधिकारिणः च कार्यं परस्परं कथं सम्बद्धम् अस्ति ?

६. कञ्चित् आरक्षकालयं गच्छन्तु अपि च जानन्तु यत् यातायातं-नियन्त्रयितुम् अपराधं वारयितुम् अधिनियमव्यवस्थां च निर्मातुं आरक्षकाः किं कुर्वन्ति,विशेषतया उत्सवानाम् अथवा सार्वजनिकसमारोहानां काले ।

७. एकस्मिन् मण्डले सर्वेषाम् आरक्षकालयानां प्रमुखः कः भवति ? जानन्तु ।

८. चर्चां कुर्वन्तु यत् नूतनस्य अधिनियमस्य अन्तर्गतं महिलाः कथं लाभान्विताः भविष्यन्ति ।

९. भवतां प्रतिवेशे किं काचित् एतादृशी महिला अस्ति यस्याः नाम्नि भू-सम्पती स्याताम् ? यदि अस्ति, तर्हि सा तां सम्पत्तिं कथं प्राप्तवती अस्ति ?

इति षष्ठोऽध्यायः